श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवादिराजयति कृतं

# ॥ श्रीलक्ष्मी आर्यावृत्तम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीलक्ष्मी आर्यावृत्तम् ॥

आर्यावृत्तं विचित्रनार्यास्सा जगति सौभगत्वकरी।
वार्याकाशाद्यखिला भूर्यावद्धार्यते त्वया देव्या॥ १ ॥

उन्मीलय मन्नयने त्वं मन्ये लक्ष्मि लोकमान्यासि।
चिन्मयसुभगावयवे कर्मकरः स्यामहं च तव कमितुः॥ २ ॥

मन्मथजननि मनोज्ञेऽहं ममतारहितयोगिकुलमहिते।
दृङ्मलमुन्मूलय मे सम्यक् श्रीकृष्णमूर्तिमीक्षेऽहम्॥ ३ ॥

कल्मषखण्डनशीले रम्यकपोले सरोजमुखि सुतनो।
अम्लानपद्महस्ते निर्मलमच्चक्षुरीक्षतां कृष्णम्॥ ४ ॥

पूर्वं त्रिगुणमयी या सर्वं कार्यं करोति या पश्चात्।
चार्वंबुजाक्षदीक्षादक्षं मेऽक्षीह सा रमा कुर्यात्॥ ५ ॥

वश्यं यस्याः सकलं
दृश्यं यस्याः समस्तमपि विश्वम्।
नश्यत्सु या न नश्येत्
क्लिश्यत्सु च या कदाऽपि न क्लिश्येत्॥ ६ ॥

ज्ञप्तेः करणानि च षट्पञ्चकृतेर्हेतुभूतकरणानि।
बुध्येयुर्यत्कृतं सिध्येद्वै तत्कलं च यत्कृपया॥ ७ ॥

सा श्रीराश्रितरक्षादीक्षा दुष्कर्मशिक्षणे च पटुः।
अश्वास्यं हि दिदृक्षोः मेऽक्ष्णोस्तद्वीक्षणोत्सवं दद्यात्॥ ८ ॥

सङ्गीतसाङ्गवेदा मङ्गलदेवी मनोज्ञसर्वाङ्गी।
भङ्गादिदोषरहिता तं गुणराशिं ममेक्षयेत्स्वपतिम्॥ ९ ॥

www.prapatti.com

शक्तिः संवित्स्फूर्तिर्मूर्तीः प्रवृत्तिश्च यद्वशे नित्यम्।
शक्ता त्वमेव सुजनोद्धर्त्री तं चेत्प्रदर्शयस्व पतिम्॥ १० ॥

कुण्डलरत्नतिलकलसन्नासामणिकण्ठसूत्रहारधरा।
अङ्गदकङ्कणकाञ्चीसत्कञ्चुकपीतवसनरशनाभा॥ ११ ॥

सद्रत्नखचितकिङ्किणिमुद्राग्रैवेयनूपुरादिरुचा।
भद्रोद्यदिन्दुवदना यया मे मध्ववरदमीक्षयतु॥ १२ ॥

या देवी निजरमणस्याङ्कगता
पश्यति स्म तं सततम्।
तस्याः स्तुतिमिति कृतवान्
कृष्णदृगर्थी स वादिराजयतिः॥ १३ ॥

॥ इति श्रीलक्ष्मी आर्यावृत्तं सम्पूर्णम्॥

www.prapatti.com